प्रारम्भाब्दः १९६४ ई.तः

ISSN 2348-9847

# सुरभारती

वर्षम् - ५२

अङ्कः ५२

## (शताब्दी विशेषाङ्कः)

### वार्षिकी शोधपत्रिका २०१५ -१६



पारम्परिकसंस्कृताध्ययनविभागः

बरोडासंस्कृतमहाविद्यालयः

महाराजसयाजीरावविश्वविद्यालयःवटोदरम्

Scanned by CamScanner

ISSN 2348-9847

# आधुनिकशिक्षायां वैदिकशिक्षायाः प्रभावः

डॉ. शत्रुघ्नपाणिग्रही (वेदविभागः)

जन्मनः आरभ्य मृत्युं यावत् मनुष्यः किमपि शिक्षति । बाल्यकाले मातृपितुः सकाशात् किशोरावस्थायां विद्यालयात् , गुरोः सानिध्यात् , पुस्तकाना-मध्ययनात् , अनुभवैः च लभ्यमानं ज्ञानं शिक्षेति कथ्यते । शिक्षायाः प्रमुखमुद्देश्यं भवति जीवनस्य सफलीकरणम् । शिक्षया मनुष्यः सदाचार-परोपकार-दयादिगुणैः विभूषितः भवति । अतएव जीवने शिक्षाय आवश्यकता निवार्यत्वेन स्वीक्रियते । शिक्षाक्षेत्रे वैदिकसाहित्यस्य योगदानम् अतीव महत्वपूर्ण विद्यते । वैदिकसाहित्य मित्युक्ते चत्वारो वेदाः, ब्राह्मणानि, आरण्यकोपनिषदानां समुदायः । वेद अस्माकं भारती ज्ञानदीपः वर्तते । अस्माकं संस्कृतिः सभ्यताश्च वैदिकतत्वमाधारीकृत्य वर्तते ।

## वैदिकशिक्षासाहित्यस्य सिद्धान्ताः-

वैदिकशिक्षा ईश्वरे बलं ददाति तथा ईश्वप्राप्तिरेव जीवनस्य मूलं लक्षमिति मन्यते । [१] प्रकृतिदेव्याः उपासनां स्वीकरोति।[२] परमात्मनः सत्ता सर्वत्र विद्यतेति स्वीकरोति । [३] वैदिकसाहित्यं सत्यानां मूल्यानां च प्राप्त्यर्थं ज्ञानं ददादि। [४] मुक्तिप्राप्त्यर्थं ज्ञानकर्मणोः समुच्चयभावः अपेक्षतेति भावं पोषयति । [५] अचेतनेष्वपि चेतनत्वस्य आरोपं करोति ।[६] अस्य जगतः सृष्टे मूलकारणं यज्ञः वर्तते ।[७] अर्थात् अग्निसोमात्मकं जगत् इति भावनायाः पुष्टिं करोति । आचार्य उपनयमानो ब्रह्मचारिणं स्वविद्यामयशरीरे गर्भरूपेण स्थापयतीति श्रूयते अथर्ववेदे । [८] अर्थात् गुरुकुले स्थित्वा विद्याध्ययनम् कर्तव्यम् । चत्वारः वर्णाः ब्रह्मणः अंशविष्वाः वर्तन्ते ।[९] आध्यात्मिकविकाशः वैदिकशिक्षायाः मूललक्षमस्ति [१०] अध्ययनध्यापनं तपो भवतीति कृष्णयजुर्वेदीयोपनिषादि श्रूयते । [११] विद्याप्रदानादधिकं महत्वपूर्ण दानं किञ्चिन्नास्तीति भावना ।[१२] पुरुषेणावश्यं यथाकालं यथोचित्त दारग्रहणं दारबिभरणं चेति कत्त । यतो हि पुरुषो यावत्कालं जायां न विन्देते तावत्पर्यन्त सोऽर्द्धो भवति । [१३] विकारभावस्य परिहारार्थं अभेददृष्टिः अपेक्षतेति शुक्लयजुर्वेदः प्रतिपादयति । [१४]

## गुरुकुलशिक्षापद्धतिः-

भारतीयसमाजे गुरुशिष्यपरम्परायाः महत्त्वं वर्तते वैदिकपरम्परायां गुरुः साक्षात् देवता गुरुः आदिः अनादिः परमदेवः । आदर्शराष्ट्रनिर्माणे गुरूणां सहयोगः महत्त्वपूर्णः भवति । जीवपुरुषस्य उद्धारकः गुरुः एव । तदा मनुष्यः ब्रह्मज्ञानप्राप्त्यर्थं गुरोः समीपं गच्छति स्म । श्रूयते मुण्डकोपनिषदि यथा-'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् । १५ सेवाबलेन तथा उपासनामाध्यमेन च गुरुं तोषयित्वा ब्रह्मज्ञानस्य अधीकारी भवति स्म । तदुक्तं श्रीमद्भगवतद्गीतायाम्-तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया । १६ पुनश्च उपनयनसंस्कारका आचार्यः यानि यान्युपदेशवाक्यानि उपदिशति तानि सर्वथा शिष्यस्य बुद्धि-प्रबुद्धकानि सन्ति तेषामुपदेशवाक्यानाम् उद्देश्यं भवति शिष्यस्य चरित्रनिर्माणम् वैदिकयुगे चरित्रनिर्माणम् एव अध्ययनस्य मूललक्ष्यसमासीत् । गुरुशिष्यसम्बन्धोऽपि उत्तमः आसीत् । तदा अध्यापकानां स्थानं सर्वोपरि आसीत् ।



Scanned by CamScanner

अथर्ववेदे आचार्यो मृत्युर्वरुणः सोम इत्युच्यते । १७ तदा विद्याध्ययनार्थं गुरुकुलं प्रति गच्छति स्म । आधुनिकयुगे यद्यपि इयं व्यवस्था आवासीयविद्यालयरूपेण अग्रे सरति तथापि तत्र दोषाः दृश्यन्ते ।

**आध्यात्मशिक्षा–**

बृहदारण्यकोपनिषदि श्रूयते यत् – ॐ पूर्णमिदः पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।। अनेन ज्ञायते पूर्णमेव मानवस्य परमोद्देश्यम् । एतदुद्देश्यं भौतिकशिक्षामाधारीकृत्य न संभवं भविष्यति । शिक्षायां ब्रह्मज्ञानस्य आध्यात्मशिक्षायाश्च आवश्यकं वर्तते महर्षि अरविन्दो पूर्णाङ्गशिक्षाविषये आध्यात्मिकाशिक्षायाः प्राधान्यं स्वीकरोति । स्वामि विवेकानन्दोऽपि कथयति यत्–Education means manifestation of the perfection already existing in the man. मनुष्येमध्ये पूर्णताया बहिरानयनमेव वास्तविकशिक्षा पूर्णतायाः परिप्रकाशः आध्यात्मज्ञानस्य आवश्यकता विद्यते । साम्प्रतिकसमाजे औद्योगिकविस्फोटेन, मूल्यबोधस्य अधःपतनेन च किं कर्तव्यं किं न क व्यम् इति विषये मानवाः वैदिकसिद्धान्तान् मूल्यबोधाश्च विस्मरन्ति । शारीरिकसुंख सर्वोपरि विचिन्त्य अन्धवत् भैतिकवादं पाश्चात्यसिद्धान्ताश्च स्वीकुर्वन्ति । मूल्यभितिकशिक्षां विना आधुनिकसमाजे सदाचारस्य, परोपकारस्य नैतिकतायाः चारित्रस्य अभावः परिलक्षितं जायते । इदानीं मानवाः त्यागमूल्यं विस्मृत्य भोगमूल्यं स्वीकुर्वन्ति। 'तेन त्यक्तेन भूञ्डीथा मा गृधः कस्यस्विद्धनः'१८ इति ईशोपनिषदः वचनं सर्वैः विस्मृतम् । भावनया त्यगपूर्वकं भोगः करणीयः। वैदिकशिक्षाया उद्देश्यमासीत् उत्तममानवनिर्माणम्। तत्र व्यष्टिमुखस्वार्थापेक्षया समष्टिमुखस्वार्थभावना सर्वत्र दरीदृश्यते । 'सहनाववतु । सह नौ भुनक्तु । सद्द.................वहै तेजस्विनावधीतमुस्त मा विद्विषावहै ''१९ इति भावना वैदिकयुगे आसीत् । परन्तु सर्वे भवन्तु सुखिनः इति भावना इदानीं कस्यापि मनसि नागच्छति । एतस्य मुख्यकारणं भवति मानवीयामूल्यबोधस्याभावः। तत् केवलं अध्यात्मशिक्षया सम्भविष्यति । तदर्थं शुक्लयजुर्वेदीय मन्त्रं श्रूयते यथा–

**यस्मिन्त्सर्वाणि भूतान्यात्मैवाभूद्विजानतः।**
**तत्र को मोहः कः शोक एकत्वमनुपश्यतः ।। इति । २०**

साम्प्रतिकशिक्षायां नैतिकशिक्षायाः विकासार्थम् उपायाः न दृश्यन्ते । अपि तु भौतिकसुखार्थं पाठ्यक्रमे अविद्यः प्रधान्यं दृश्यते । वैदिकशि समावर्तनसमारोहे स्वकर्तव्यविषये गुरुतः उपदेशः स्वीकृतः शिष्यैः । यथा 'वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति । सत्यं वद । धर्मं चर । स्वध्यायान्मा प्रमदः आचार्यय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः । सत्या प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रम.......स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् । देवपितृकार्याभ्यां न प्रमदितव्यम् । मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव । अतिथिदेवो भव । यान्यनवद्यानि कर्माणि । तानि सेवितव्यानि । नो इतराणि । यान्यस्माकं सुचरितानि । तानि त्वयोपास्यानि ।।२१ इति । आधुनिकशिक्षाव्यवस्थायां इमानि नैतिकमूल्यानि छात्रेषु न दृश्यन्ते ।

अतः निष्कर्षरूपेण वक्तुं शक्यते यत् आधुनिकजगतः कृते वैदिकशिक्षायाः योगदाने एते सन्ति महत्वपूर्णविषयाः यथा–सत्यस्यावधारणा, प्रायश्चितविधानम् , अहिंसा, परोपकारः, धैर्यम् परिश्रमः,



Scanned by CamScanner

विश्वबन्धुत्वभावना, वर्णाश्रमव्यवस्था, राष्ट्रप्रेम, उत्तमशासन, व्यवस्था
अनुशासनम्, क्षमा, धर्मः, दानम्, उत्तमगुरुशिष्यसम्बन्धः, आत्मसाक्षात्कारश्च । प्रकृत्या
कर्मणः उपासना, विद्याया उपासना, वैदिकसमाजः सर्वदा सन्नद्ध आसीत् । ब्रह्मचर्याश्रमे अर्जितायाः विद्यायाः
सामञ्जस्यस्याभावः दूरीकर्तुं येन सा विद्या लोकहितकारिणी स्यादित्यस्यापि शिक्षा वैदिकयुगे
उचितप्रयोगः कथं गृहस्थाश्रमे करणीयः निहितानि सन्ति । एतेषां शैक्षिकतत्त्वानामुपयोगं
आसीत् । वैदिकसाहित्ये एतानि सर्वाणि शैक्षिकत्वानि निहितानि सन्ति । एतेषां तत्वानां आधुनिकसमाजे उत्तमराष्ट्रस्य गठनं भविष्यति । इति ।
वर्तमानयुगेऽपि कर्तुं शिन्कुमः । एतेषां तत्वानां आधुनिकसमाजे उत्तमराष्ट्रस्य गठनं भविष्यति । इति ।

१. उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत–कठोपनिषद् १/३/१४

२. शुक्लयजुर्वेद– १/२५/–२६

अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम् ।
दुदोह यज्ञसिध्यर्थं ऋग्यजुः सामलक्षणम् । ।। मनुस्मृति –१/२३

३. ईशा वाम्यमिदं सर्वं –शुक्लयजुर्वेदः ४०/१

४. सत्यं ज्ञानम् अनन्तं ब्रह्म–तैतिरीयोपनिषदि–२/१

५. वद्यां चाविद्या च यस्तद्वेदोभयं सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययामृतश्नुते ।।
शुक्लयजुर्वेदः ४०/१४

६. ओषधे त्रायस्वैनम् , श्रृणोत ग्रावाणः–तैत्तिरीयसंहिता १/३/१३/१

७ शुक्लयजुर्वेदीय पुरुषसूक्तम् –३१

८. आचार्य उपनयमानो ब्रह्मचारिण कृणुते गर्भमन्तः ।
तं रात्रीस्त्रिस्र उदरे विभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः.
अथर्ववेद :–११/५/३

९. ब्राह्मणोऽस्य मुखमासीद्वाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत।। शुक्लयजुर्वेद :–३१/११

१०. याज्ञवल्क्यस्मतौ १/२१२

११. ऋतं च स्वाध्यायप्रवचने च...तप इति तपोनित्यः पौरुशिष्टिः। स्वाध्यायप्रवचने नाको मौदूल्यः ।
तद्धि तपस्तद्धि तपः ।। इति ।
तैत्तिरीयोपनिषदि –१/९
शतपथब्राह्मणे– ११/५/७/२

१२. न ब्रह्मयज्ञातदधिकोऽस्ति यज्ञो न तत्प्रदानात् दानम्
सर्वे तदन्ताः क्रतवः सदाना नान्तो दृष्टः कैश्चिदस्य द्विकस्य ।। इति ।
कात्यायनस्मृतौ –१४/८

१३. अर्द्धो वा एष आत्मनः यत्पत्री ।। इति कृष्णयजुर्वेदयतैत्तिरीयब्राह्मणे ३/३/३/५

१४. यस्तु सर्वाणि भूतान्यात्मन्नेवानुपश्यर्ता ।
सर्वभूतेषु चात्मानं ततो न वि जुगुत्पसते ।।
शुक्लयजुर्वेदकाण्वसंहिता ४०/६



Scanned by CamScanner

१५. मुण्डकोपनिषद- १/१/१२
१६. गीता- ४/३४
१७ आचार्यो मृत्यर्वरुणः सोम ओषधयः पयः । अथर्ववेदः - १११/५/१४
१८. इशोपनिषदि -१
१९. कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि -२/१
२०. शुक्लयजुर्वेद ४०/७
२१. तैत्तिरीयोपनिषदि-शिक्षावल्ली १९.२०

Scanned by CamScanner